# Contents


1 vAtApi gaNapatim 3

2 shrI mUlAdhAracakra 5

3 siddhivinAyakam 6

4 vAmAnkasthitayA 7

5 pancamAtanga 8

6 vallabhAnAyakasya 10

7 mahAgaNapatim 11

8 mahAgaNapate 12

9 mahAgaNapatim vande 13

10 gaNesha kumAra 14

11 gaNarAjena 15

12 gaNanAyakam 16

13 shrI mahAgaNapatiravatu mAm 17

14 hastivadanAya 19

15 uchchiShTa gaNapatau 21

16 vighneshvaram 22

17 lambodarAya 23

18 svetagaNapatim 24

19 karikaLabhamukham 25

**20 shrI gaNeshAt param** **27**

**21 gajAnanayutam** **28**

**22 vinAyaka vighnanAshaka** **29**

**23 raktagaNapatim** **30**

**24 ekadantam bhajeham** **31**

**25 shrIgaNanAtham bhajare** **32**

**26 herambAya** **33**

**27 shaktisahita gaNapatim** **34**

## 1 vAtApi gaNapatim

# वातापिगणपतिं भजेऽहम्

### रागम्ः हंसध्वनि (२९) तालम्ः आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

वातापिगणपतिं भजेऽहं वारणास्यं वरप्रदम् श्री

**अनुपल्लवि**

भूतादिसंसेवितचरणं भूतभौतिकप्रपञ्चभरणं

**मध्यमकाल साहित्यम्**

वीतरागिणं विनतयोगिनं विश्वकारणं विघ्नवारणम्

**चरणम्**

पुरा कुम्भसंभवमुनिवरप्रपूजितं त्रिकोणमध्यगतं

मुरारिप्रमुखाद्युपासितं मूलाधारक्षेत्रस्थितम्

परादिचत्वारिवागात्मकं प्रणवस्वरूपवक्रतुण्डं
निरन्तरं निटिलचन्द्रखण्डं निजवामकरविधृतेक्षुदण्डम्

**मध्यमकाल साहित्यम्**

कराम्बुजपाशबीजापूरं कलुषविदूरं भूताकारं

हरादिगुरुगुहतोषितबिम्बं हंसध्वनिभूषितहेरम्बम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 2 shrI mUlAdhAracakra

# श्री मूलाधारचक्रविनायक

## रागम्: श्री (२२) तालम्: आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्री मूलाधारचक्रविनायक अमूल्यवरप्रदायक

### अनुपल्लवि

मूलाज्ञानशोकविनाशक मूलकन्दमुक्तिप्रदायक

### चरणम्

सकलीकृतदेवादिदेव शबलीकृतसर्वज्ञस्वभाव

प्रकटीकृतवैखरीस्वभाव पराभव प्रसिद्धगजग्रीव

विकट षट्शतश्वासाधिकार विचित्राकार भक्तोपकार
अकळङ्कविभास्वर विघ्नेश्वर हरगुरुगुहसोदरलम्बोदर

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 3 siddhivinAyakam

# सिद्धिविनायकम्

### रागम्ः चामरम् (५६) तालम्ः रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

सिद्धिविनायकं अनिशं चिन्तयाम्यहं प्र-
सिद्धगणनायकं विशिष्टार्थदायकं वरम्

**अनुपल्लवि**

सिद्धयक्षकिन्नरादिसेवितं अखिलजगत्-
प्रसिद्धं मूलपङ्कजमध्यस्थं मोदकहस्तम्

**चरणम्**

भाद्रपदमासचतुर्थ्यां ब्रह्मणादिपूजितं

पाशाङ्कुशधरं छत्रचामरपरिवीजितम्

रौद्रभावरहितं दासजनहृदयविराजितं
रौहिणेयानुजार्चितं ईहनावर्जितम्

**मध्यमकाल साहित्यम्**

अद्रिराजसुतात्मजं अनन्तगुरुगुहाग्रजं
भद्रप्रदपदाम्बुजं भासमानचतुर्भुजम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 4 vAmAnkasthitayA

# वामाङ्कस्थितया

## रागम्ः अठाणा (२९) तालम्ः खण्ड एकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

वामाङ्कस्थितया वल्लभयाऽश्लिष्टं
वारणवदनं देवं वन्देऽहम्

### अनुपल्लवि

वामनस्वरूपं वरदं सचापं चामरकर्णं शशिशेखरतनयं
नामरूपधरं अभिनवगुरुगुहहृदयम्

### चरणम्

अष्टाङ्गयोगवरहठाणवादिजय-

वसिष्टादितपोधनसेवितगणनाथम्
सृष्ट्यादिकारणं श्रितपालनं हेतुदृष्टान्तवर्जितं देवतापूजितम्

### मध्यमकाल साहित्यम्

दुष्टविघ्नहरणं शिष्टभक्तभरणं
इष्टफलदचरणं शिष्टहृद्विहरणम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 5 pancamAtanga

# पञ्चमातङ्गमुखगणपतिना

## रागम्ः मलहरि (१५)  ताळम्ः रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

पञ्चमातङ्गमुखगणपतिना
परिपालितोऽहं सुमुखेन श्री

### अनुपल्लवि

पञ्चभूतात्मकप्रपञ्चोदयादिकरण-

### मध्यमकाल साहित्यम्

विरिञ्चिहरिरुद्रनुतेन पञ्चवक्त्रशिवसुतेन

### चरणम्

वरदाभयपाशसृणिकपालदन्त-

मोदकमुद्गराक्षमालाकरेण

कमलापुरविहारेण पुरुहूता-
द्यखिलदेवपूजितविघ्नेश्वरेण

### मध्यमकाल साहित्यम्

वरगुरुगुहसोदरेण सुरुचिरलम्बोदरेण

करुणार्द्रगौरतरेण कलिमलहरणचतुरेण

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 6 vallabhAnAyakasya

# वल्लभानायकस्य

## रागम्: बेगड (२९)    ताळम्: रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

वल्लभानायकस्य भक्तो भवामि

### मध्यमकाल साहित्यम्

वाञ्छितार्थदायकस्य वरमूषिकवाहनस्य

### समष्टिचरणम्

पल्लवपदमृदुतरस्य पाशाङ्कुशादिधरस्य
मल्लिकाजातीचंपकहारस्य मणिमालस्य

### मध्यमकाल साहित्यम्

वल्लीविवाहकारणस्य गुरुगुहपूजितस्य
काळीकलामालिनीकमलाक्षीसन्नुतस्य

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 7 mahAgaNapatim

# महागणपतिम्

## रागम्ः नाट (३६) तालम्ः चतुरश्र एकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

महागणपतिं मनसा स्मरामि

### मध्यमकाल साहित्यम्

वसिष्ठवामदेवादिवन्दितम्

### समष्टिचरणम्

महादेवसुतं गुरुगुहनुतं मारकोटिप्रकाशं शान्तं

### मध्यमकाल साहित्यम्

महाकाव्यनाटकादिप्रियं मूषिकवाहनमोदकप्रियम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 8 mahAgaNapate

# महागणपते

## रागम्: नटनारायणि (२८) तालम्: आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

महागणपते पालयाशु मां
मायामयवल्लभापते श्री

### समष्टिचरणम्

महानटनारायणीनन्दन मानितदेवदेवकीनन्दन

### मध्यमकाल साहित्यम्

महेश्वरगुरुगुहभक्तचन्दन मातङ्गवदनेन्द्रादिवन्दन

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 9 mahAgaNapatim vande

# महागणपतिं वन्दे

## रागम्ः तोडि (८)     ताळम्ः रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

महागणपतिं वन्दे माधवाद्यमरवृन्दम्

### अनुपल्लवि

अहन्तादिरहितं शक्तिसहितं
आनन्ददन्तं तमेकदन्तम्

### चरणम्

त्रिपुरवधार्यं शिवेन त्र्यम्बकेनार्चितं

उपनिषत्प्रतिपादितं उमामहेश्वरसुतम्

कपिलवसिष्ठादिनतं कञ्जजादिभिरीडितं
कपिलं कृष्णपूजितं करिवदनसुशोभितम्

### मध्यमकाल साहित्यम्

सुपर्णवाहसेवितं सुरगुरुगुहभावितं
कपित्थाम्रपनसजम्बूकदलीफलभक्षितम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 10 gaNesha kumAra

# गणेशकुमार

## रागम्ः जुंजूटि (२८) तालम्ः चतुरश्र एकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

गणेशकुमार पाहि मां गजमुख

### समष्टिचरणम्

(मम) मनोरथसिद्धिदायकागमपदादिनुत भव श्री

### मध्यमकाल साहित्यम्

गुरुगुहहित गजमुख

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 11 gaNarAjena

# गणराजेन

## रागम्ः आरभि (२९)    ताळम्ः मिश्र चापु

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

गणराजेन रक्षितोऽहं गुणिजनादिनुतपल्लवपदेन

### समष्टिचरणम्

अणिमाद्यष्टसिद्धिप्रदेन माणिक्यमकुटादिधरेण
मन्त्रिणीपुजितसुमुखेन मानितगुरुगुहवन्दितेन

### मध्यमकाल साहित्यम्

दिनकरकोटिप्रकाशेन विनताश्रितमन्दारेण
मनुपुजितपाशाङ्कुशेन काननस्थितब्रह्मचर्येण

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 12 gaNanAyakam

# गणनायकम्

## रागम्: रुद्रप्रिया (२२) तालम्: आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

गणनायकम् भजेऽहं भजे
कमलेशनुतं कामरिपुसुतम्

### अनुपल्लवि

अणिमादिसिद्धिदायकं सुमुखम्

### चरणम्

वाणीरमणानन्दं वरदं
वदने द्विरदं वरबालगुरुगुहम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 13 shrI mahAgaNapatiravatu mAm

# श्रीमहागणपतिरवतु माम्

## रागम्: गौळ (१५) ताळम्: तिश्र त्रिपु,त

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्रीमहागणपतिरवतु मां
सिद्धिविनायको मातङ्गमुखः श्री

### अनुपल्लवि

कामजनक विधीन्द्रसन्नुतकमलालयतटनिवासो

### मध्यमकाल साहित्यम्

कोमळतरपल्लवपदकरगुरुगुहाग्रजः शिवात्मजः

### चरणम्

सुवर्णाकर्षणविघ्नराजो पादाम्बुजो

गौरवर्णवसनधरो फालचन्द्रो

नरादिविनुतलम्बोदरो

कुवलयस्वविषाणपाशाङ्कुश-

मोदकप्रकाशकरो भवजलधिनावो
मूलप्रकृतिस्वभावस्सुखतरो

## मध्यमकाल साहित्यम्

रविसहस्रसन्निभदेहो

कविजननुत मूषिकवाहो

अवनतदेवतासमूहो
अविनाशिकैवल्यगेहो श्री

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 14 hastivadanAya

# हस्तिवदनाय

### रागम्ः नवरोज् (२९) ताळम्ः मिश्र चापु

### श्री मुत्तुस्वामि दीक्षित विरचिता

#### पल्लवि

हस्तिवदनाय नमस्तुभ्यं
हाटकमयमण्डपे सिंहासनस्तिताय

#### अनुपल्लवि

हस्तिकृत्तिवसनधरार्चित महागणपाय
तत्वस्वरूपाय

#### मध्यमकाल साहित्यम्

समस्तभक्तानुग्रहाय
मायालिङ्गितविग्रहाय

#### चरणम्

कमलोत्पलपाशशङ्खचक्रेक्षु-

कार्मुकव्रीह्यग्रगदानिजविषाण-

मातुलङ्गरत्नकलशधरण-

कराम्बुजाय पदपङ्कजाय विमलाय

विश्वोत्पत्तिस्थितिविलयाय करुणालयाय

**मध्यमकाल साहित्यम्**

हिमाद्रितनयाननपङ्कजहिरण्यगर्भाय

सुमनसे उमारमणकुमारगुरुगुह-
समानवरौजसे महसे

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 15 uchchiShTa gaNapatau

# उच्छिष्टगणपतौ

## रागम्: काशीरामक्रिय (५१) तालम्: आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

उच्छिष्टगणपतौ भक्तिं कृत्वोन्नतपदवीं
व्रज रे रे हृदय

### अनुपल्लवि

सच्छब्दवाच्यस्वरूपिणि शबळीकृतब्रह्मस्वरूपिणि

### मध्यमकाल साहित्यम्

चिच्छक्तिस्फूर्तिस्वरूपिणि चिदानन्दनाथस्वरूपिणि

### चरणम्

नारीयोनीमुखास्वादने नग्नरामक्रियामोदने
भेरिवीणावेणुवादने भेदाज्ञानध्वान्तसूदने

### मध्यमकाल साहित्यम्

शौरिनुते नतगुरुगुहमदने सूरिजनयुतश्रीपुरसदने
दूरीकृतमहादुरितकदने गौरीशनन्दने गजवदने

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 16 vighneshvaram

# विघ्नेश्वरम्

## रागम्ः मलहरि (१५) ताळम्ः आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

विघ्नेश्वरं भजरे मानस
विधिगुरुगुहपूजितवरं श्री

### अनुपल्लवि

विघ्नवारणविनायकमनिशं
वीरादिविनुतविघ्नराजम्

### चरणम्

श्वेताम्बरधरं श्वेतार्कपुष्पमालावृतं

पाशाङ्कुशधरं पन्नगाभरणप्रियकरम्

प्रणतभक्तार्तिभञ्जनं चतुरतरं

भूतगणादिसेवितपल्लवपादपङ्कजपद्मकरम्

भूतभौतिकप्रपञ्चाधिभरणं
भवपाशमोचनं शुभकरम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 17 lambodarAya

# लम्बोदराय

### रागम्ः वराळि (३९) तालम्ः खण्ड चापु

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

लम्बोदराय नमस्ते श्री

**समष्टिचरणम्**

कुम्भजपूजिताय इभवदनवरदाय
अभयवरप्रदाय अम्बुजासननुताय

**मध्यमकाल साहित्यम्**

साम्बशिवात्मजाय जम्बूकदलीफल-
सारभक्षिताय गुरुगुहाग्रजाय

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 18 svetagaNapatim

# श्वेतगणपतिम्

## रागम्ः रागचूडामणि (३२) ताळम्ः त्रिपुट

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्वेतगणपतिं वन्दे वामदेवप्रतिपाद्यमनाद्यम्

### समष्टिचरणम्

भूतगणादिसंसेवितं बुद्धगुरुगुहसंभावितं

### मध्यमकाल साहित्यम्

मातङ्गमुखं वल्लभासमेतं विरागचूडामणिम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 19 karikaLabhamukham

# करिकळभमुखम्

## रागम्ः सावेरि (१५) तालम्ः रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

करिकळभमुखं ढुंढिगणेशं भज रे रे चित्त
कावेरीतटस्थितं सावेरीरागनुतम्

### अनुपल्लवि

हरिहयादिसकलदेवताराधितपदाम्बुजं

### मध्यमकाल साहित्यम्

गिरिजातनुजं विजितमनसिजं गुरुगुहाग्रजम्

### चरणम्

मूलाधारचतुर्दळपङ्कजमध्यस्थं

मोदकहस्तं मुनिजनहृत्कमलस्थम्

फालचन्द्रं सुमुखं करुणासान्द्रं
पाशाङ्कुशधरं पद्मकरं सुन्दरम्

### मध्यमकाल साहित्यम्

नीलग्रीवसुकुमारं नीरदशोभाहरं

पालितभक्तं धीरमपारं वारं वारम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 20 shrI gaNeshAt param

# श्रीगणेशात्परम्

## रागम्ः आर्द्रदेशि (१५) ताळम्ः झंप

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्रीगणेशात्परं चित्त न हि रे रे
शिवादिषट्त्रिंशत्तत्वस्वरूपिणः

### अनुपल्लवि

वागादिपञ्चकव्यापाररहित-
हृदयाकाशसंस्थिताद्योगिराजार्चितात्

### चरणम्

मातङ्गवदनादुमारुद्रदर्शितात् भूतभौतिक-

विश्वपूजितकळेभरात् श्वेतार्कसुमधरात् स्वेतर-
विवर्जितात् पीताम्बरावृतात् ब्रह्माद्युपासितात्

### मध्यमकाल साहित्यम्

भूतादिनुतपदाम्भोजाच्छिवात्मजाच्छीतांशुधर -
परमशिवगुरुगुहाग्रजात्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 21 gajAnanayutam

# गजाननयुतम्

### रागम्ः वेगवाहिनि (१६) ताळम्ः चतुरश्र एकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

गजाननयुतं गणेश्वरं भजामि सततं सुरेश्वरम्

**समष्टिचरणम्**

अजेन्द्रपूजितविघ्नेश्वरं गणादिसन्नुतपदपद्मकरं

**मध्यमकाल साहित्यम्**

कुञ्जरभञ्जनचतुरतरकरं गुरुगुहाग्रजं प्रणवाकारम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 22 vinAyaka vighnanAshaka

# विनायक

## रागम्ः वेगवाहिनि (१६) तालम्ः रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

विनायक विघ्ननाशक मां तारय दयानिधे

### अनुपल्लवि

अनाथरक्षक आरूढमूषिक

### मध्यमकाल साहित्यम्

दक्षशिक्षक मोदकभक्षक

### चरणम्

शिवगुरुगुहविधिपूजित आश्रितजनपरिपालक
देवराजपुरतोषित वेगवाहिनीवर्धित

### मध्यमकाल साहित्यम्

रविशशिवह्निनेत्र रतिपतिसन्नुतशुभगात्र
पवनात्मजानन्दकर राममित्र वरपवित्र

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 23 raktagaNapatim

# रक्तगणपतिम्

## रागम्ः मोहनम् (६५) ताळम्ः आदि

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

रक्तगणपतिम् भजेऽहं
रत्नसिंहासनपतिं सुरपतिम्

### अनुपल्लवि

रक्ताम्बरधरं रागद्वेषादिहरं
पार्वतीप्रियकरं मोहनकरम्

### चरणम्

परशुरामक्षेत्रप्रभावं पायसान्नहोमादिविभावं
पञ्चकृत्यातीतस्वभावं भक्तजनादिसमूहवैभवम्

### मध्यमकाल साहित्यम्

सकलकार्यार्थसिद्धिदं स्थिरं वामदेवादिपूजितं वरं
वारिजभववन्दितवल्लभेशं गुरुगुहनुतं परमशिवसुतम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

# 24 ekadantam bhajeham

# एकदन्तं भजेऽहम्

## रागम्: बिलहरि (२९) तालम्: मिश्र चापु

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

एकदन्तं भजेऽहं एकानेकफलप्रदम्

### अनुपल्लवि

पाकशासनाराधितं पामरपण्डितादिनुतपदम्

### चरणम्

कैलासनाथकुमारं कार्तिकेयमनोहरं
हालास्यक्षेत्रवेगवतीतटविहारं हरम्

### मध्यमकाल साहित्यम्

कोलाहलगुरुगुहसहितं कोटिमारलावण्यहितं
मालाकङ्कणादिधरणं माषावल्लभाम्बारमणम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 25 shrIgaNanAtham bhajare

# श्रीगणनाथं भजरे

## रागम्: ईशमनोहरि (२८) तालम्: रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

श्रीगणनाथं भजरे चित्त पराशक्तियुतम्

### अनुपल्लवि

नागयज्ञसूत्रधरं नादलयानन्दकरम्

### चरणम्

आगमादिसन्नुतं अखिलदेवपूजितं
योगशालिभावितं भोगिशायिसेवितम्

### मध्यमकाल साहित्यम्

रागद्वेषादिरहितरमणीयहृदयविदितं
श्रीगुरुगुहसंमुदितं चिन्मूलकमलस्थितम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 26 herambAya

# हेरम्बाय

## रागम्: अठाणा (२८) तालम्: रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### पल्लवि

हेरम्बाय नमस्ते हरिब्रह्मेन्द्रादिसेविताय
शिवकुमाराय

### अनुपल्लवि

वीरगणादिमुदिताय वीरादिवरप्रदाय

### चरणम्

सूरिजनोपासिताय सुरगुरुगुहसेविताय

परमेश्वरकुमाराय पञ्चहस्ताय पाशाङ्कुशधराय
प्रसिद्धगणनाथाय विनायकाय

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇

## 27 shaktisahita gaNapatim

# शक्तिसहित गणपतिम्

## रागम्ः शङ्कराभरणम् (२९)     ताळम्ः तिश्र एकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### नोट्टु स्वर साहित्यम्

शक्तिसहितगणपतिं शङ्करादिसेवितं

विरक्तसकलमुनिवरसुरराजविनुत गुरुगुहम्

भक्ताळिपोषकं भवसुतं विनायकं
भुक्तिमुक्तिप्रदं भूषिताङ्गं रक्तपादाम्बुजं भावयामि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇